# शतावरी

Sukrala, Stanya kari, Balya, Vata-Pitta-Asra-Sopha hara.

Mahasatavari is Medhya, Hrdya, Vrshya, Rasayani, Sita in Virya, cures Arsa, Grahani and Nayana amaya.(Bpn)

नारायणी द्वीपिशत्रुर्दीपिका धरकण्टका ।
अभिरुस्तुंग्नी केशी पीवरी द्वीपपीवरी ॥
सहस्रवीर्या मधुरा फणिजिह्वोर्ध्वकण्टका ।
ऋष्यप्रोक्ता सूक्ष्मपत्रा महापुरुषदन्तिका ॥ **(Kdn)**

Narayani, dvipisatru, dvipika, dharakantaka, abhiru, tungini, kesi, pivari, dvipapivari, sahasravirya, madhura, phanijihva, urdhvakantaka, suksma patra, mahapurusha dantika are the synonyms for satavari.

शतावरी शतपदी पीवरीन्दीवरी वरी ।
भीरुर्दीप्या द्वीपिशत्रुर्दीपिकाऽमरकण्टिका ॥
सूक्ष्मपत्रा सुपत्रा च बहुमूला शताह्वया ।
नारायणी स्वादुरसा शताह्वा लघुपर्णिका ॥
आत्मशल्या जटामूला शतवीर्या महौदनी ।
मधुरा शतमूला च केशिका शतनेत्रिका ॥
विश्वाख्या वैष्णवी काषर्णी वासुदेवी वरीयसी ।
दुर्मरा तेजवल्ली च स्यात्त्रयस्त्रिंशदाह्वया ॥

महाशतावरी वीरा तुङ्गिनी बहुपत्रिका ।
सहस्रवीर्या सुरसा महापुरुषदन्तिका ॥
ऊर्ध्वकण्टा महावीर्या फणिजिह्वा महाशता ।
शतवीर्या सुवीर्या च नामान्यस्यास्त्रयोदश ॥ **(Rjn)**

Synonyms of satavari are satapadi, pivari, indivari, vari, bhiru, dipya, dvipi, satrudipika, amarakantika, suksmapatra, supatra, bahumula, satahvaya, narayani, svadurasa, satahva, laghuparnika, atmasalya, jatamala, satavirya, mahaudini, madhura, satamula, kesika, satanetrika, visvakhya, vaisnavi, karsini, vasudevi, variyasi, durmara and tejavalli.

Synonyms of mahasatavri are vira, tungini, bahupatrika, sahasravirya, surasa, mahapurusadantika, urdhvakanta, mahavirya, phanijihva, mahasata, satavirya and suvirya.

शतावरी गुरुः शीता तिक्ता स्वाद्वी रसायनी ।
मेधाग्निपुष्टिदा स्निग्धा नेत्र्या गुल्मातिसारजित् ॥
शुक्लस्तन्यकरी बल्या वातपित्तास्रशोफजित् ।

महाशतावरी मेध्या हृद्या वृष्या रसायनी ॥
शीतवार्या निहन्त्यर्शोग्रहणीनयनामयान् । **(Bpn)**

Satavari is tikta, svadu in rasa, guru, snigdha in guna, sita in veerya, rasayani, medha agni pustida, netrya, sukrala, stanya kari, balya, alleviates gulma, atisara, vata, pitta, asra and sopha.

Mahasatavari is sita in veerya, medhya, hrdya, vrshya, rasayani, cures arsa, grahani and nayana amaya.

वातपित्तहरी वृष्या स्वादुतिक्ता शतावरी ।
महती चैव हृद्या च मेधाग्निबलवर्द्धिनी ॥
ग्रहण्यर्शोविकारघ्नी वृष्या शीता रसायनी ।
कफपित्तहरास्तिक्तास्तस्या एवाङ्कुरा स्मृताः ॥ **(Su.S.Su 46)**

Satavari is svadu, tikta in rasa, vrshya, alleviates vata and pitta.

Mahati variety is sita in veerya, hrdya, vrshya, rasayani, medha agni bala vardhini, alleviates grahani and arsa.

Its ankura is tikta in rasa, alleviates kapha and pitta.

वातपित्तहरा वृष्या बल्या शीता रसायनी ।
स्वादुः शतावरी तैलघृतयोगेशु पूजिता ॥ **(Mdn)**
Satavari is svadu in rasa, sita in veerya, vrshya, balya, rasayani, alleviates vata and pitta, is more effective when used along with taila and ghrta.

शतावरी हिमा तिक्ता रसे स्वादुः क्षयास्रजित् ।
वातपित्तहरा वृष्या रसायनवरा स्मृता ॥
सहस्रवीर्या मेध्या तु हृद्या वृष्या रसायनी ।
शीतवीर्या निहन्त्यर्शोग्रहणीनयनामयान् ॥
तदङ्कुरास्त्रिदोषघ्नो लघुरर्शःक्षयापहः । **(Dhn)**

Satavari is tikta, svadu in rasa, hima in veerya, alleviates vata and pitta, cures ksaya, asra, is vrshya, rasayana vara, medhya, hrdya, vrshya, rasayani, and cures arsa, grahani, nayana amaya.

Its ankura is laghu in guna, alleviates tridosha, arsa and ksaya.

शतावर्यौ हिमे वृष्ये मधुरे पित्तजित्परे ।
कफवातहरे तिक्ते महाश्रेष्ठे रसायने ॥
शतावरीद्वयं वृष्यं मधुरं पित्तजिद्धिमम् ।
महती कफवातघ्नी तिक्ता श्रेष्ठा रसायने ।
कफपित्तहरास्तिक्तास्तस्या एवाङ्कुरा स्मृता ॥ **(Rjn)**

Satavirya is madhura in rasa, hima in veerya, vrshya, mahasresta rasayana, pitta hara param, kapha vata hara.

Both the types are madhura in rasa, vrshya, and alleviates pitta.

Mahati is tikta in rasa, srestha rasayana, alleviates kapha and vata.

Its ankura is tikta in rasa, alleviates kapha and pitta.

शतावरी हिमा तिक्ता स्वाद्वी गुर्वी रसायनी ।
सुस्निग्धा शुक्लला बल्या स्तन्यमेधाग्निपुष्टिदा ॥

चक्षुष्या वातपित्तास्रगुल्मातीसारशोफजित् ।

महाशतावरी हृद्या मेधग्निबलशुक्लदा ॥
ग्रहण्यर्शोऽक्षिरोगघ्नी शीतवीर्या रसायनी ।

तदङ्करो लघुस्तिक्तो वृष्यो हृद्यस्त्रिदोषनुत् ॥
निहन्ति वातपित्तास्रग्रहणीगुदजक्षयान् ॥ **(Kdn)**

Satavari is tikta, svadu in rasa, guru in guna, hima in veerya, rasayani, susnigdha, sukrala, balya, stanya medha agni pustida, caksushya, alleviates vata, pitta, asra, gulma, atisara and sopha.

Maha satavari is hrdya, medha agni bala sukrada, cures grahani, arsa, aksi roga and is rasayani.

Its ankura is tikta in rasa, laghu in guna, vrshya, hrdya, alleviates tridosha, cures vata, pitta, asra, grahani nad gudaja ksaya.

शतावरा तु मधुरा शीता वृष्या च तिक्तका ।
रसायनी गुरुः स्वादु स्निग्धा दुग्धप्रदा मता ॥
अग्निदीप्तिकरी बल्या मेध्या शुक्लकरी मता ।
चक्षुष्या पुष्टिकृत्पित्तकफवातक्षयापहा ॥
रक्तदोषगुल्महन्त्री शोफातीसारनाशिनी ।

तैले घृते प्रेयोगार्थ प्रशस्ता मुनिभिर्मता ॥

महाशतावरी हृद्या मेध्या चाग्निप्रदीपनी ।

शुक्लला शीतवीर्या च बल्या वृष्या रसायनी ॥
अर्शसंग्रहणीरोगनेत्ररोगविनाशिनी ।
गुणाह्यस्यास्तु विज्ञेयाः पूर्वायाः सदृशा गुणैः ॥ **(Nir)**

Satavari is madhura in rasa, guru, snigdha in guna, sita in veerya, vrsya, tikta, svadu in rasa, rasayani, dugdha prada, agni dipti kari mata, balya, medhya, sukrakari, caksushya, pusti kara, alleviates pitta, vata, ksaya, cures rakta dosha, gulma, sopha and atisara.

When used along with taila and ghrta it is more effective.

Mahasatavari is sita in veerya, hrdya, medhya, agni pradipani, sukrala, balya, vrshya, rasayani, cures arsa, sangrahani, netra roga, where in the rest of the properties are similar to the previous one.